"न व्यहन्यत कदाचिदर्थिता" रघुः। याच्ञायास्तु व्याघातः याच्ञाफलालाभ एव भवति। "यद्यर्थिता तु दारैःस्यात् क्लीवादीनां कथञ्चन" मनुः। ४कामनायाञ्च।

**अर्थिन्** त्रि० अर्थ+अस्त्यर्थे इनि। १याचके, २सेवके, असन्निहितधने ३धनस्वामिनि। "नैन्नतार्थिनमवज्ञया मुहुः" "शात्रवादिव पराङ्मुखोऽर्थिन" इति च माघः "यथाकामार्च्चितार्थिनाम्" "ततः समानीय स मानितार्थी" इति च रघुः। ४कार्य्यार्थिनि "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" या०स्मृ०। "स धर्म्मस्यसखः शश्वद् अर्थिप्रत्यर्थिनां स्वयम्"रघुः स्त्रियां ङीप्। "कान्तार्थिनी तु या याति"इत्यमरः सन्निहितधने तु अर्थवानित्येव।

**अर्थिसात्** अव्य०अर्थिभ्योदेयमधीनं करोति अर्थिन्+साति। याचकाधीनतया कृते देये। "विभज्य मेरुर्न यदर्थिसात्कृतः" नैषधम्। कृभ्वस्त्यादियोगएवास्य साधुता।

**अर्थे** अव्य०—के। साक्षा०। अर्थेकृत्य अर्थेकृत्वा इत्यर्थे असार्थकं सार्थकं साम्याद्येत्यर्थे गणरत्ने तु "विकल्पने प्रभृतीनामेदन्तत्वं लवणादीनाञ्च मान्तत्वं गणपाठसामर्थ्यादेव यद्वा सप्तमीप्रतिरूपकम् द्वितीया प्रतिरूपकञ्च निपातनात्" इत्युक्तम्। तथाच २अर्थशब्दार्थे च।

**अर्थोपमा** स्त्री अर्थेन नतु शब्देन उक्ता उपमा। लुप्तोमा भेदे। विवरणमुपमाशब्दे।

**अर्थोपक्षेपक** पु० अर्थान् प्रयोजनानि उपक्षिपति उप+क्षिप-ण्वुल्। नाटकाङ्गभेदे विष्कम्भकादिपञ्चके "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि" सा०द०।

**अर्थ्य** त्रि०अर्थात् प्रयोजनादनपेतः यत्। सार्थके सप्रयोजने "वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे" कुमा०। "अर्थ्यामर्थपतिर्वाचम्" रघुः। "स्तुत्यं स्तुतिभिरर्थ्याभिः" रघुः। २पण्डिते पु०। अर्थस्य भावः यत्। ३वस्तुस्वभावे। अर्थादागतः। ४न्याय्ये। अर्थ—कर्म्मणि यत्। ५याचनाकर्म्मणि अर्थनीये। अर्थाय साधुः यत्। ६अर्थसाधने त्रि०।

**अर्द्द** पीड़ने भ्वादि०उभ०सक० सेट्। अर्द्दति ते आर्द्दीत् आर्द्दिष्ट। "रक्षःसहस्राणि चतुर्द्दशार्दीत्"रघुः। आनर्द्द अर्द्दकः अर्द्दी अर्द्दित्वा अर्द्दितः। अति-अतिपीडने। अत्यर्द्दितः अभि+आभिमुख्येन पीडने। "अभेश्वाविदूर्य्ये" पा० उक्तेः सामीप्ये च अभ्यर्णः समीपवर्त्ती "कालोऽभ्यर्णं जलागमः" सा०द०। अन्यत्र अभ्यर्द्दितः। निस्+निर्+वा—भृशपीडने। "सोऽस्याय पराङेव प्राणो निरर्द्दति" शत० ब्रा०। वि+विशेषेण पीड़ने "तद् या ऊर्म्मी व्यर्द्दतः पशौ वा पुरुषे वा" शत० ब्रा०। सम्+समर्णः नि+न्यर्णः वि+व्यर्णः।

**अर्द्द** याचने, गतौ, सक०पीड़ायां अक०भ्वादि०पर० सेट्। अर्द्दति आर्द्दीत्। याचने "शरद्घनं नार्द्दति चातकोऽपीति" रघुः।

**अर्द्द** बधे चुरा० उभय० सक० सेट्। अर्द्दयति ते आर्द्दिदत् त। "येनार्द्दिदत् दैत्यपुरं पिनाकी" भट्टिः। "अभ्यर्णौ गिरिकूटाभानभ्यर्णानार्द्दिदत् द्रुतम्" भट्टिः। सम्+सम्यक्पीड़ने "यन्तारमस्य सहसा त्रिभिर्वाणैः समार्द्दयत्" भा०व०प० प्रति+प्रतिरूपपीड़ने यस्य यत्कर्तृकं पीड़नं तेनैव पुनस्तस्य पीड़ने "प्रत्यर्द्दयत संक्रुद्धो राघवः पुनराहवे" रामा०।

**अर्द्दन** न०अर्द्द—ल्युट्। १गतौ २पीड़ायां ३बधे ४याचने च।

**अर्द्दना** स्त्री चु० अर्द्द—भावे युच्। १हिंसायां बधे।

**अर्द्दित** त्रि० अर्द्द—क्त। १पीड़िते, २गते, ३याचिते च। ४रोगभेदे न० "अर्दयित्वाऽनिलोवक्त्रमर्दितं जनयत्यतः। वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते। शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्। ग्रीवाचिवुकदन्तानां तस्मिन् पार्श्वे तु वेदना। यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलम्। वायुरूर्द्ध्वं त्वचि स्वापस्तोदोमन्याहनुग्रहः। तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः। क्षीणस्या निमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः। न सिध्यत्यर्दितं वाढ़ं त्रिवर्षं वेपनस्य च"। इति सुश्रु०। "क्षयकासश्वास व्रणा र्शोऽर्द्दितापहम्"। "हनुमोक्षमधीमन्यमर्दितञ्च सुदारुणम्" इति च सुश्रु०।

**अर्द्दितिन्** त्रि० अर्दितमस्त्यस्य इनि। नेत्रादिरोगभेदयुक्ते "अर्दिती कर्णशूली च दन्तरोगीच मानवः" सुश्रु०।

**अर्द्ध** पु० ऋध—वृद्धौ भावादौ घञ्। १वृद्धौ। आधारे घञ्। २गृहादौ। "आतू न इन्द्र! वृत्रहन्नस्माकमर्द्धमागहि" यजु०३३,६५। "अर्द्धम् निवासदेशम्"वे०दी०। अधि+ऋध-अच्। वृद्धिप्राप्तआधारे २वायौ। "कतमोऽध्यर्द्ध इति" प्रश्ने "योऽयं पवते"इत्युत्तरं दत्त्वा "तदाहुर्यदयमेकइवैव पवतेऽथ कथमध्यर्द्ध" इति प्रश्ने उत्तरम्। 'यदस्मिन्निदं सर्व्वमध्यार्ध्नोत् अस्मिन्वायौ सति इदं सर्व्वम् अधिकमाप्नोति प्राणः आप्त प्राप्नोतिइति तेनाध्यर्द्ध" इति का०उ०। करणे घञ्। ४अवयवरूपे खण्डे अवयवेनेवोपचयात् अवयविनो